Ref. No. 78/CSSC        Date 20/05/2024

# सूचना

अनया सूचनया सर्वेऽपि विद्यार्थिनः सस्नेहं सूच्यन्ते यत् आगामिनः २४-०५-२०२४ दिनाङ्कात् ३०-०५-२०२४ पर्यन्तम् अस्माकं महाविद्यालये **कालिदासस्य कृतिषु दलित पात्राणां भूमिका -: वर्तमानसन्दर्भे** इति विषये सप्तदिवसीया कार्यशाला प्रचलिष्यति। क्षणोऽयं अस्माकं कृते गौरवाय भविष्यति। तात्र कार्यशालां देशस्य विभिन्नेभ्यः प्रसिद्ध विश्वविद्यालयेभ्यः विदेशेभ्यश्च सादरं निमन्त्रिताः विद्वांशः स्वकीयैर्बहुकालसञ्चितैरनुभवैः सिञ्चयिष्यन्ति।एवंविधोऽवसरः नाल्पपुण्येन लभ्यते । अतश्च प्रेयांसो विद्यार्थिनो भवन्तः अनिवार्यरूपेणोपस्थाय उत्साहपूर्वकं च भागं गृहीत्वा पूर्णरुपेण लाभान्विताः सन्तु ।

एवमेव जूनमासस्य षष्ठदिनाङ्कात् समारभ्य अष्टमदिनाङ्कं यावत् (०६-०६-तः ०८-०६-२०२४) **भारतीयसाहित्येषु नारीवादिचेतना** इति विषये त्रिदिवसीया सङ्गोष्ठी भविष्यति

यस्यां सङ्गोष्ठ्यां देशस्य विभिन्नेभ्यो विश्वविद्यालयेभ्यो देशान्तरस्य विश्वविद्यालेभ्यश्च समागतानां विदुषां विदुषीनां च आध्यक्षे राज्यान्तरेभ्यश्च समागताः विद्वांसः शोधपत्रवाचनं करिष्यन्ति। अन्येषां विशिष्टविदुषां सोधपूर्णं व्याख्यानं च भविष्यति । अतः अस्मिन ज्ञानमहायज्ञे भवतां भवतीनाञ्चोपस्थितिर्ज्ञानवर्धनाय आत्मकल्याणाय च भविष्यति । चिन्तयन्तु एवंविधोऽवसरो न सर्वदोपलभ्यते अतश्च नितरां प्रमादं परित्यज्य तस्मिन्ज्ञानयज्ञे उपस्थाय ज्ञानलाभं कुर्वन्तु ।

प्राचार्य
Principal In-Charge
Sikkim Govt. Sanskrit Mahavidyalaya
Samdong, Gangtok Sikkim
20/5/2024
सिक्किम सरकारी संस्कृत महाविद्यालय,साम्दोंग